# द्वितीयसमाकलनपरीक्षा, 2017

## संस्कृतम्

अवधिः - होरात्रयम् | कक्षा - नवमी | पूर्णांकाः - अशीतिः

विद्यार्थिनः नाम ........................................................................................ वर्गः ....... दिनांकः - 16.9.2017 (शनिवासरः)

**निर्देशाः -**

- **अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।**
- **प्रत्येक खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।**
- **प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया ।**
- **सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।**

## खण्डः - क (अपठितांश अवबोधनम् - 10 अंकाः)

**प्र.1 अधोलिखितं अनुच्छेदं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि लिखत -**

भारतवर्षे षट् ऋतवः भवन्ति। तेषु वसन्तः ऋतुराजः कथ्यते। चैत्रे वैशाखे च मासे वसन्तस्य ऋतुः भवति। वसन्ते द्वौ प्रमुखौ उत्सवौ भवतः - वसन्तोत्सवः होलिकोत्सवः च। वसन्तोत्सवे सर्वत्र प्रमादो भवति। नराः नार्यः च सर्वत्र गायन्ति नृत्यन्ति च। होलिकोत्सवः फाल्गुन मासस्य पूर्णिमायां मान्यते। हर्षातिरेकेण नराः नार्यः युवानः वृद्धाः बालकाः च प्रसन्नाः जायन्ते। जनाः परस्परं रक्तवर्णं रक्तचूर्णं च प्रक्षिपन्ति। द्वेषं विस्मृत्य सर्वे परस्परं मिलन्ति। रात्रौ जनाः परस्परम् आमन्त्र्य प्रीतिभोजं कृत्वा आमोदं मानयन्ति। वार्तालापस्य माध्यमेन सर्वे जनाः कण्ठेन मिलित्वा स्वजीवनं सुखमयं कुर्वन्ति ।

**क) एकपदेन उत्तरत -** **(½×4=2)**

अ) भारते कति ऋतवः भवन्ति ?

ब) कदा सर्वत्र प्रमादो भवति ?

स) सर्वे किं विस्मृत्य परस्परं मिलन्ति ?

द) होलिकोत्सवः कस्यां तिथौ मान्यते ?

**ख) पूर्णवाक्येन उत्तरत -** **(2×2=4)**

अ) होलिकोत्सवे नराः नार्यः च किं कुर्वन्ति ?

ब) वार्तालापस्य माध्यमेन सर्वे जनाः किं कुर्वन्ति ?

**ग) भाषिक कार्यम् -** **(½×4=2)**

अ) 'ऋतुराजः' इति कस्य पदस्य विशेषणम् ?

(i) वैशाखः (ii) चैत्रः (iii) वसन्तस्य (iv) फाल्गुनस्य

ब) 'नार्यः' इति पदस्य विलोमपदं चित्वा लिखत -

(i) नराः (ii) महिलाः (iii) सर्वे (iv) दानवाः

स) 'प्रक्षिपन्ति' इति क्रियायाः कर्तृपदं किम् ?

(i) जनाः (ii) बालकाः (iii) कन्याः (iv) नार्यः

द) 'भारतवर्षे षट् ऋतवः भवन्ति ।' अत्र क्रियापदं किम् ?

(i) भवन्ति (ii) षट् (iii) ऋतवः (iv) भारते

**घ) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत ।** **(1×2=2)**

## खण्डः - ख (रचनात्मककार्यम् - 15 अंकाः)

**प्र.2 पित्रे रक्तदान शिविर विषयकं पत्रं मंजूषायां प्रदत्तपदानां सहायतया पूरयत -** (10×½=5)

परीक्षाभवनात्

दिनांकः 16.09.2017

पूज्य पितृमहोदय,

(1).....................

अत्र कुशलं तत्रास्तु। ह्यः (2).................... विद्यालये (3).................... रक्तदानशिविरम् आयोजितम् । सर्वप्रथमं अस्माकं (4).................... स्वरक्तं प्रायच्छत् । तदनन्तरम् (5)................. अध्यापकाः एतस्मिन् (6).................... अग्रसराः अभवन् । तेषाम् (7).................... दृष्ट्वा अहम् अतीव (8).................... अभवम् । भवान् अपि एतां (9).................... दृष्ट्वा प्रसन्नो भविष्यति इति आशास्महे। चिन्तया अलम्।

भवदीयः पुत्रः

(10).....................

| मञ्जूषा - | मम, प्राचार्यः, एकम्, अनेके, चरणवन्दना,<br>भावनाम्, प्रभावितः, शुभकार्ये, कौस्तुभः, उत्साहम् |
|---|---|

**प्र.3 मंजूषायां प्रदत्तैः पदैः प्रदत्तस्य चित्रस्य वर्णनं पञ्चसु संस्कृतवाक्येषु कुरूत -** (5×2=10)



| मञ्जूषा - | पिपासितः, काकः, पाषाणखण्डानि, घटस्य, वनम्,<br>जलम्, वृक्षाः, बालिका, गृहम्, पर्वताः, उपरि, संतुष्टः, भवति |
|---|---|

## खण्डः - ग (अनुप्रयुक्तव्याकरणम् - 25 अंकाः)

**प्र.4 क) वर्णसंयोजनेन पदनिर्माणं विकल्पेभ्यः चित्वा लिखत -** (2×1=2)

क् + अ + म् + अ + ल् + अ + म् = ................. ।

अ) कमलाम् ब) कलमम् स) कामलम् द) कमलम्

**ख) प्रदत्तशब्दस्य शुद्धं वर्णविन्यासं लिखत -**

जननी = ....................... ।

**प्र.5 अधोलिखितानां प्रश्नानाम् समुचितम् उत्तराणि लिखत -** **(3×1=3)**

क) 'ऋ' वर्णस्य उच्चारण स्थानं किम् ?

ख) 'घ्' वर्णस्य उच्चारण स्थानं किम् ?

ग) 'उपनेत्रम्' अत्र कः वर्णः नासिक्यः वर्तते ?

अ) उ  ब) ए  स) त्र्  द) म्

**प्र.6 अधोलिखितेषु वाक्येषु रेखांकितपदानां सन्धिच्छेदम् अथवा सन्धिं कृत्वा लिखत -** **(1×4=4)**

क) <u>भानुरपि</u> गृहादागतः ।

ख) तेन सह <u>जगदीशः</u> नास्ति ।

ग) <u>सहसा + एव</u> वृष्टिः आगता ।

घ) साम्प्रतं <u>ग्रीष्म + ऋतुः</u> अस्ति ।

अ) ग्रीष्मृतुः  ब) ग्रीष्मतुः  स) ग्रीर्ष्मतुः  द) ग्रीष्मर्तुः

**प्र.7 उचितैः शब्दरूपैः वाक्यानि पूरयत -** **(1×4=4)**

क) तत्पश्चात् ................ चणकान् दास्यामि । (कपि)

ख) सः ................ सह वसति । (पिता)

ग) जनाः ................ प्रणमन्ति । (नृप)

घ) ................ सरोवरे नीलकमलानि सन्ति ।

अ) अस्य  ब) अस्याम्  स) अस्मिन्  द) अस्मै

**प्र.8 कोष्ठकेषु प्रदत्तेषु धातुनाम् उचितंरूपं निर्माय वाक्यानि पूरयत -** **(1×4=4)**

क) शिष्याः गुरून् ................ । (सेव् - लट्लकारे)

ख) अहं श्वः पाठं ................ । (पठ्)

ग) ह्यः त्वं कुत्र ................ ? (गम्)

घ) त्वं शिक्षकं प्रश्नं ................ । ('प्रच्छ्' लृट्लकारे)

अ) पृच्छत  ख) प्रक्ष्यसि  स) पृच्छन्तु  द) पृच्छामि

**प्र.9 उचितविभक्तिपदैः वाक्यानि पूरयत -** **(1×4=4)**

क) बालकः ................ विभेति । (सिंह)

ख) ................ पृष्ठतः कः ? (ग्राम)

ग) छात्राः ................ सह भ्रमणाय गच्छन्ति । (गुरु)

घ) अध्यापकः ................ प्रवीणः अस्ति ।

अ) पाठनस्य  ब) पाठने  स) पाठनम्  द) पाठनाय

**प्र.10 रेखांकितपदेषु प्रकृति प्रत्ययं प्रयुज्य विभज्य वा लिखत -** **(1×4=4)**

क) त्वम् अधिगम्य एव पठ ।

ख) बालः आपणं गत्वा शाकं क्रीणाति ।

ग) शिष्यः पठ् + क्त्वा श्यामपट्टे लिखति ।

घ) अहम् अधुना फलानि आ + नी + तुमुन् आपणं गच्छामि ।

अ) आनीतुम् ब) आनेतुम् स) अनेतुम् द) आनोतुम्

## खण्डः - घ (पठितावबोधनम् - 30 अंकाः)

**प्र.11 अधोलिखितं गद्यांशं, पद्यांशं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि उत्तरपुस्तिकायां लिखत -**

**क) गद्यांशः**

अत्र तु दैवम् कारणमिति न उचितम् अतः सर्वथा दैवम् आलस्यं च विहाय पुरूषार्थः विधेयः । एतत् चिन्तयित्वा राजा पण्डितसभां कारितवान् । राजा उवाच - 'भोः भोः पण्डिताः । श्रूयतां मम वचनम् - अस्ति कश्चिद् एवम्भूतो विद्वान् यो मम पुत्राणां नित्यम् उन्मार्गगामिनाम् अनधिगतशास्त्राणाम् इदानीं नीतिशास्त्रोपदेशेन पुनर्जन्म कारयितुं समर्थः ?

**अ) एकपदेन उत्तरत -** **(1×2=2)**

(i) अत्र किं कारणं न उचितम् ?

(ii) नृपस्य पुत्राः कीदृशाः आसन् ।

**ब) पूर्णवाक्येन उत्तरत -** **(1×2=2)**

दैवम् आलस्यं च विहाय कः कर्तव्यः ?

**स) भाषिककार्यम् -** **(½×4=2)**

(i) अनुच्छेदे 'भाग्यम्' इति पदस्य कः पर्यायः प्रयुक्तः ?

(a) देवः (b) ईश्वरः (c) आत्मा (d) दैवम्

(ii) 'यो मम पुत्राणाम्' अत्र 'मम' पदं कस्मै प्रयुक्तम् ?

(a) पण्डितेभ्यः (b) विदुषे (c) राज्ञे (d) पुत्रेभ्यः

(iii) 'एतत् चिन्तयित्वा राजा पण्डित सभां कारितवान् ।' अत्र क्रियापदं किम् ?

(a) राजा (b) सभाम् (c) कारितवान् (d) एतत्

(iv) असमर्थः इति पदस्य कः विपर्ययः अत्र प्रयुक्तः ?

(a) इदानीम् (b) अधुना (c) समर्थः (d) उचितम्

**ख) पद्यांशः**

यदि सत्संगतिरतो भविष्यसि भविष्यसि ।
अथ दुर्जन संसर्गे पतिष्यसि पतिष्यसि ।।

**अ) एकपदेन उत्तरत -** **(1×2=2)**

(i) कुत्र स्थितः जनः पतिष्यति ?

(ii) कस्मिन् रतः जनः सफलो भविष्यति ।

**ब) पूर्णवाक्येन उत्तरत -** **(1×2=2)**

'यदि सत्संगतिरतो भविष्यसि भविष्यसि ।' सत्संगतेः फलं किं भवति ?

**स) भाषिककार्यम् -** **(½×4=2)**

**(i)** श्लोके 'सत्संगतिः' पदस्य कः विपर्ययः प्रयुक्तः ?

**(a)** दुर्जन **(b)** दुर्जनसंसर्गः **(c)** संसर्गः **(d)** पतिष्यसि

**(ii)** 'पतिष्यसि' क्रियायाः कर्तृपदं योजय ।

**(a)** सः **(b)** अहम् **(c)** मूढः **(d)** त्वम्

**(iii)** 'दुस्संगे' इत्यस्य पदस्य कः पर्यायः श्लोके लिखितः ?

**(a)** संसर्गे **(b)** दुर्जन **(c)** सत्संगतिः **(d)** दुर्जनसंसर्गे

**(iv)** श्लोकस्य 'भविष्यसि' इत्यस्याः क्रियायाः कर्तृपदं किम् ?

**(a)** सत्संगतिः **(b)** सत्संगतिरतः **(c)** जनः **(d)** त्वम्

**ग) नाट्यांशः**

रामः - मे शापितो न परिरक्षसि चेत् स्वराज्यम् ।

भरतः - हन्त ! अनुत्तरम् अभिहितम् । भवतु, समयतः ते राज्यं परिपालयामि ।

रामः - वत्स ! कः समयः ?

भरत : - मम हस्ते निक्षिप्तं तव राज्यं चतुर्दशवर्षान्ते प्रतिग्रहीतुम् इच्छामि ।

रामः - एवमस्तु ।

भरतः - आर्य ! अन्यमपि वरं हर्तुम् इच्छामि ।

रामः - वत्स ! किमच्छसि ? किमहं ददामि ? किम् अहम् अनुष्ठास्यामि ?

**अ) एकपदेन उत्तरत -** **(1×2=2)**

**(i)** रामः कस्मै शापस्य भयं प्रयच्छति ?

**(ii)** 'हन्तः ! अनुत्तरम् अभिहितम् ।' इति कः कथयति ?

**ब) पूर्णवाक्येन उत्तरत -** **(1×2=2)**

भरतस्य कः समयः आसीत् ?

**स) भाषिक कार्यम् -** **(½×4=2)**

**(i)** 'निक्षिप्तम्' इति विशेषणस्य कः विशेष्यः अत्र प्रयुक्तः ?

**(a)** राज्यम् **(b)** मम **(c)** प्रतिग्रहीतुम् **(d)** तव

**(ii)** 'ददामि' इति क्रियापदस्य कर्तृपदं किम् ?

**(a)** किम् **(b)** किमहम् **(c)** अहम् **(d)** वरम्

**(iii)** 'ग्रहीतुम्' इति अर्थे अत्र किं विलोम पदं प्रयुक्तम् ?

**(a)** समयः **(b)** एवमस्तु **(c)** वरम् **(d)** हर्तुम्

**(iv)** 'मम' पदस्य कः विपर्ययः अत्र प्रयुक्तः ?

**(a)** हन्त **(b)** चेत् **(c)** तव **(d)** समयः

**प्र.12 अधोलिखित कथनेषु रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरूत -** **(1×4=4)**

क) सर्वप्राणिषु बन्धुभूतः स्यात् ।

ख) पृथिव्यां त्रीणि रत्नानि सन्ति ।

ग) त्वद् आगमनम् आर्याय निवेदयामि ।

घ) एतत् चिन्तयित्वा राजा पण्डितसभां कारितवान् ।

**प्र.13 अधोलिखितस्य श्लोकद्वयस्य अन्वयं मञ्जूषायाः उचित पदैः पूरयत -** **(1×4=4)**

क) गच्छन् पिपीलको याति योजनानां शतान्यपि ।

अगच्छन् वैनतेयोऽपि पदमकं न गच्छति ।।

**अन्वयः** - गच्छन् (1)..................... योजनानां (2)..................... अपि याति । अगच्छन् (3).... ................. एकं (4)...................... अपि न गच्छति ।

ख) सद्भिस्तु लीलया प्रोक्तं शिलालिखितमक्षरम् ।

असद्भिः शपथेनापि जले लिखितमक्षरम् ।।

**अन्वयः** - सद्भिः तु (1)................... प्रोक्तम् (अपि) शिला (2)................... अक्षरम् (इव भवति) असद्भिः (3)................... प्रोक्तम् अपि (4)................... लिखितम् अक्षरम् (इव भवति)

**मञ्जूषा -** लीलया, पिपीलकः, वैनतेयः, लिखितम्, जले, शपथेन, शतानि, पदम् ।

**प्र.14 अधोलिखितपङ्क्तिषु रेखांकितपदानां प्रसंगानुसारं शुद्धम् अर्थं लिखत -** **(1×4=4)**

क) न नक्तं दधि भुञ्जीत ।

अ) दिवसे ख) निशायाम् ग) सायंकाले घ) मध्याह्ने

ख) चक्षुः श्रोत्रं घ्राणं जिह्वा त्वक् च इति पंचेन्द्रियाणि ।

अ) नेत्रम् ब) तनुः स) नासिका द) जिह्वा

ग) सः वेदान् अधीत्य पितुः सकाशम् आगच्छत् ।

घ) क्षिप्रम् अक्रियमाणस्य कालः पिबति तद् रसम् ।